## दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । (८५/१०७७)

प्राग्दीव्यतः इत्येव । दिति अदिति आदित्य इत्येतेभ्यः, पत्युत्तरपदात् च प्रातिपदिकात् प्राग्दीव्यतीयेष्वर्थेषु ण्यः प्रत्ययो भवति । दैत्यः । [1]आदित्यः । [2]आदित्यम् । पत्युत्तरपदात् – प्राजापत्यम् । सैनापत्यम् ।

[३७४] यमाच्चेति वक्तव्यम् ।

याम्यम् ।

[३७५] वाङ्मतिपितृमतां छन्दस्युपसंख्यानम् । (म. भा. २. २३६)

'वाच्यः' (वा. सं १३. ५८) । 'मात्या' (मै.सं. २.१७.१९) । 'पैतृमत्यम्' (वा.सं. ७. ४६) ।

[३७६] पृथिव्या ञाञौ । (म. भा. २. २३६)

'[3]पार्थिवा' (ऋ. १. ६४. ३) । 'पार्थिवी' (पै. १६. ४६. ३) ।

[३७७] देवाद् यञञौ । (म. भा. २. २३६)

'दैव्यम्' (ऋ. १. ३१. १७) । 'दैवम्' (पै. १.३१.४)

[३७८] बहिषष्टिलोपश्च । (म. भा. २. २३६)

'बाह्याः' (अ. १९. ४४. ६) ।

[३७९] ईकक् च । (म. भा. २. २३६)

बाहीकः ।

[३८०] ईकञ् छन्दसि । (म. भा. २. २३६)

[4]बाहीकः । स्वरे विशेषः । टिलोपवचनमव्ययानां भमात्रे टिलोपस्य अनित्यत्वज्ञापनार्थम् । आरातीयः[5] ।

[३८१] स्थाम्नोऽकारः । (म. भा. २. २३७)

अश्वत्थामः ।

[३८२] लोम्नो[6]ऽपत्येषु बहुषु । (म. भा. २. २३७)

उडुलोमाः । [7]शरलोमाः । बहुषु इति किम् ? औडुलोमिः । शारलोमिः ।

[३८३] सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत्[8] । (म. भा. २. २३७)

गव्यम् । अजादिप्रत्ययप्रसङ्गे इति किम् ? गोभ्यो हेतुभ्य आगतं गोरूप्यम् । गोमयम् ।

[३८४] ण्यादयोऽर्थविशेषलक्षणादपवादात् पूर्वविप्रतिषेधेन । (म. भा. २. २३७)

दितेरपत्यं दैत्यः । वनस्पतीनां समूहः वानस्पत्यम् (म. भा. २. २३७) । कथं दैतेयः[9] ? दितिशब्दात् 'कृदिकारादक्तिनः' (ग. सू. ५०), '[10]सर्वतोऽक्तिन्नर्थाद् इत्येके' (ग. सू. ५१) इति ङीषं कृत्वा स्त्रीभ्यो ढक् (४. १. १२०/११२३) क्रियते । लिङ्गविशिष्टपरिभाषा चानित्या[11] ॥

---

1. आदित्यस्य अपत्यं इत्यधिकम् फ. ह. 2. नास्ति ड. फ. 3. नास्ति ह. 4. बाहीकम् फ. 5. शाश्वतीयः इत्यधिकम् ह. 6. अपत्ये क. ड. ई. 7. नास्ति फ. 8. वक्तव्यः इत्यधिकम् क. फ. 9. इति इत्यधिकम् फ. 10. सर्वतः नास्ति ह, क्तिन्नर्थात् नास्ति ड.फ. 11. विधानसामर्थ्यादेव टिलोपः इत्यधिकम् क.